# योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०८५



वाल्मीकिः

पञ्चाशीतितमः सर्गः ८५

श्रीवसिष्ठ उवाच ।

इति नृत्यति सा देवी दीर्घदोर्दण्डमण्डलैः ।

परिस्पन्दात्मकैर्व्योम कुर्वाणा घनकाननम् ।। १

क्रियासौ नृत्यति तथा चितिशक्तिरनामया ।

अस्या विभूषणं शूर्पकुडालपटलादिकम् ।। ऐ

शरशक्तिगदाप्रासमुसलादि शिलादि च ।

भावाभावपदार्थौघकलाकालक्रमादि च ।। ३

चित्स्पन्दोऽन्तर्जगद्धत्ते कल्पनेव पुरं हृदि ।

सैव वा जगदित्येव कल्पनैव यथा पुरम् ।। ४

पवनस्य यथा स्पन्दस्तथैवेच्छा शिवस्य सा ।

यथास्पन्दोऽनिलस्यान्तः प्रशान्तेच्छस्तथा शिवः ।।५

अमूर्तो मूर्तमाकाशे शब्दाडम्बरमानिलः ।

यथा स्पन्दस्तनोत्येवं शिवेच्छा कुरुते जगत् ।। ६

नृत्यन्त्याथ यदा तत्र तथा तस्मिन्पराम्बरे ।

काकतालीययोगेन संरम्भवशतः स्वयम् ।। ७

निकटस्थः शिवः स्पृष्टः स मनागभ्रमन्तिकम् ।

वाडवोऽग्निः स्वनाशाय वहन्त्येवाम्बुलेखया ।। ८

स्पृष्टमात्रे शिवे तस्मिंस्ततः परमकारणे ।

प्रवृत्ता प्रकृतिं गन्तुं सा शनैरुरजां तथा ।। ९

अनन्ताकारतां त्यक्त्वा संपन्ना गिरिमात्रिका ।

ततो नगरमात्रासौ ततश्च द्रुमसुन्दरी ।। १०

ततो व्योमसमाकारा शिवस्यैवाकृतिं ततः ।

सा प्रविष्टा सरिच्छान्तसंरम्भेव महार्णवम् ।। ११

एक एवाभवदथो शिवया परिवर्जितः ।

शिव एव शिवः शान्त आकाशे शमनोऽभितः ।।१२

श्रीराम उवाच ।

भगवञ्छिवसंस्पृष्टा सा शिवा परमेश्वरी ।

किमर्थमागता शान्तिमिति मे ब्रूहि तत्त्वतः ।। १३

श्रीवसिष्ठ उवाच ।

सा राम प्रकृतिः प्रोक्ता शिवेच्छा पारमेश्वरी ।

जगन्मायेति विख्याता स्पन्दशक्तिरकृत्रिमा ।। १४

स परः प्रकृतेः प्रोक्तः पुरुषः पवनाकृतिः ।

शिवरूपधरः शान्तः शरदाकाशशान्तिमान् ।। १५

भ्रमति प्रकृतिस्तावत्संसारे भ्रमरूपिणी ।

स्पन्दमात्रात्मिका सेच्छा चिच्छक्तिः पारमेश्वरी।।१६

यावन्न पश्यति शिवं नित्यतृप्तमनामयम् ।

अजरं परमाद्यन्तवर्जितं वर्जितद्वयम् ।। १७

संविन्मात्रैकधर्मित्वात्काकतालीययोगतः ।

संविद्देवी शिवं स्पृष्ट्वा तन्मयीव भवत्यलम् ।। १८

प्रकृतिः पुरुषं स्पृष्ट्वा प्रकृतित्वं समुज्झति ।

तदन्तरेकतां गत्वा नदीरूपमिवार्णवे ।। १९

आपगा हि पयोमात्रं सङ्गे अर्णव एव सा ।

यदा तदा तमेवाशु प्राप्य तत्रैव लीयते ।। २०

चितिः शिवेच्छा सा देवं तमेवासाद्य शाम्यति ।

जन्मस्थानशिलां प्राप्य तीक्ष्णधारा यथायसी ।। २१

पुंसश्छायां निजच्छाया प्रविष्टस्य शरीरकम् ।

यथाशु प्रविशत्येव प्रकृतिः पुरुषं तथा ।। २२

चेतित्वा चिन्निजं भावं पुरुषाख्यं सनातनम् ।

भूयो भ्रमति संसारे नेह तत्तां प्रयाति हि ।। २३

साधुर्वसति चोरौघे तावद्यावदसौ नतम् ।

परिजानाति विज्ञाय न तत्र रमते पुनः ।। २४

द्वैते तावदसद्रूपे रमते भ्रमते चितिः ।

परं पश्यति नो यावत्तं दृष्ट्वा तन्मयी भवेत् ।। २५

चितिनिर्वाणरूपं यत्प्रकृतिः परमं पदम् ।

प्राप्य तत्तामवाप्नोति सरिदब्धाविवाब्धिताम् ।। २६

तावद्विमोहवशतश्चितिराकुलेषु

सर्गेषु संसरति जन्मदशासु तासु ।

यावन्न पश्यति परं तमथाशु दृष्ट्वा

तत्रैव मज्जति घनं मधुनीव भृङ्गी ।। २७

संप्राप्य कस्त्यजति नाम तदात्मतत्त्वं

प्राप्यानुभूय च जहाति रसायनं कः ।

शाम्यन्ति येन सकलानि निरन्तराणि

दुःखानि जन्ममृतिमोहमयानि राम ।। २८

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वाणप्रकरणे उ० पाषा० प्रकृतिपुरुषक्रमवर्णनं नाम पञ्चाशीतितमः सर्गः ।।८५।।